SS – 127

# I Semester B.H.M./B.C.A. Examination, Nov./Dec. 2018
## (CBCS) (F + R) (2014-15 and Onwards)
## LANGUAGE SANSKRIT – I
## Meghadutam, Grammar and Comprehension

Time : 3 Hours

Max. Marks : 70

***Instructions :*** *1) Answer in **Sanskrit/Kannada/English**.*
*2) Questions Nos **I**, **V** and **VI** should be answered in **Sanskrit** only.*

I. समीचीनम् उत्तरं चिनुत। (10×1=10)

ಸರಿಯಾದ ಉತ್ತರವನ್ನು ಆರಿಸಿ ಬರೆಯಿರಿ :

Select the correct answer :

1) यक्षस्य दूत: क: ?

अ) कुबेर: आ) मेघ: इ) वरुण: ई) इन्द्र:

2) चेतनाचेतनेषु प्रकृतिकृपणा: के ?

अ) कामार्ता आ) तृषार्ता इ) अर्थाता: ई) चिन्तार्ता

3) वासवदत्ता कस्य प्रियदुहिता ?

अ) कालिदासस्य आ) भोजस्य इ) यक्षस्य ई) प्रद्योतस्य

4) यक्ष: केन शप्त: ?

अ) कुबेरेण आ) यक्षराजेन इ) इन्द्रेण ई) शिवेन

5) कालिदासस्य काव्यशैली का ?

अ) वैदर्भी आ) गौडीया इ) पाञ्चाली ई) मिश्रा

6) नभसि मेघं के सेविष्यन्ते ?

अ) बलाका: आ) मयूरा: इ) चातका: ई) पिका:

7) यक्ष: कस्मिन् दिने मेघं ददर्श ?

अ) श्रावणस्य प्रथमदिने आ) आषाढस्य प्रथमदिने

इ) माघस्य प्रथमदिने ई) चैत्रस्य प्रथमदिने

8) शखणभव: क: ?

अ) शिव: आ) गणेश: इ) स्कन्द: ई) काम:

P.T.O.

LIBRARY
Surana College
No. 16, South End Road,
BA'GALORE - 560 004

9) अवन्तीराजपुत्री का ?

अ) वासवदत्ता आ) शकुन्तला इ) पद्मावती ई) सीता

10) मेघदूतम् किं प्रकारकं काव्यम् ?

अ) महाकाव्यम् आ) नाटकम् इ) आदिकाव्यम् ई) खण्डकाव्यम्

II. **द्वयो** प्रश्नयो: उत्तरं लिखत : **(2×10=20)**

ಯಾವುದಾದರೂ ಎರಡು ಪ್ರಶ್ನೆಗಳಿಗೆ ಉತ್ತರವನ್ನು ಬರೆಯಿರಿ :

Answer **any two** of the following :

1) उज्जयिनी वर्णनं।

ಉಜ್ಜಯಿನೀ ವರ್ಣನೆ

Description of Ujjaini

2) कालिदासस्य देश काल कृति जीवनमधिकृत्य प्रबन्धं लिखत।

ಕಾಳಿದಾಸನ ದೇಶ, ಕಾಲ, ಕೃತಿ ಮತ್ತು ಜೀವನವನ್ನಾಧರಿಸಿ ಪ್ರಬಂಧ ಬರೆಯಿರಿ.

Write an essay on place, date, works and life of Kalidasa.

3) यक्षेण निर्दिष्टं अलकापर्यन्तं मार्गं विवृणुत।

ಅಲಕಾನಗರಿಯವರೆಗೆ ಯಕ್ಷನಿಂದ ನಿರ್ದೇಶಿಸಿದ ಮಾರ್ಗವನ್ನು ವಿವರಿಸಿ.

Describe the path upto "Alaka" as directed by Yaksha.

III. **त्रयाणां** श्लोकानाम् अनुवादं कृत्वा भावं विवृणुत। **(3×4=12)**

ಯಾವುದಾದರೂ **ಮೂರು** ಶ್ಲೋಕಗಳನ್ನು ಅನುವಾದಿಸಿ ವಿವರಿಸಿ :

Translate and explain **any three** of the following :

1) तस्य स्थित्वा कथमपिपुर: कौतुकाधानहेतो:
अन्तर्बाष्पश्चिरमनुचरो राजराजस्य दध्यौ।
मेघालोके भवति सुखिनोप्यन्यथा वृत्ति चेत:
कण्ठाश्लेषप्रणयिनि जने किं पुनर्दूरसंस्थे।।

2) कर्तुं यच्चप्रभवति महीमुच्छिलीन्ध्रामवन्ध्यां
तच्छ्रुत्वा ते श्रवणसुभगं गर्जितं मानसोत्का:।
आकैलासाद्बिसकिसलयच्छेदपाथेयवन्त:
संपत्स्यन्ते नभसि भवतो राजहंसा: सहाया:।।

3) वक्र: पन्था यदपि भवत: प्रस्थितस्योत्तराशां
सौधोत्सङ्गप्रणयविमुखो मा स्म भूरुज्जयिन्या:।
विद्युद्दामस्फुरितचकितैस्तत्र पौराङ्गनानां
लोलापाङ्गैर्यदि न रमसे लोचनैर्वञ्चितोऽसि।।

4) आपृच्छस्व प्रियसखममुंतुङ्गमालिङ्ग्य शैलं
वन्द्यै: पुंसां रघुपतिपदैरङ्कितं मेखलासु।
काले काले भवति भवतो यस्य संयोगमेत्य
स्नेहव्यक्तिश्चिरविरहजं मुञ्चतो बाष्पमुष्णम्।।

5) प्रत्यासन्ने नभसि दयिताजीवितालम्बनार्थी
जीमूतेन स्वकुशलमयीं हारयिष्यन्प्रवृत्तिम्।
स प्रत्यग्रै: कुटजकुसुमै: कल्पितार्घाय तस्मै
प्रीत: प्रीतिप्रमुखवचनं स्वागतं व्याजहार।।

IV. **द्वयो:** ससन्दर्भं विवृणुत : **(2×4=8)**

ಯಾವುದಾದರೂ **ಎರಡು** ವಾಕ್ಯಗಳನ್ನು ಸಂದರ್ಭಸಹಿತ ವಿವರಿಸಿ :

Annotate **any two** of the following :

1) कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु।

2) क्षीण: क्षीण: परिलघु पय: स्रोतसां चोपभुज्य।

3) शैषै: पुष्पैर्हृतमिव दिव: कान्तिमत्खण्डमेकम् ।

4) इत्यागन्तूनमयति जनो यत्र बन्धूनभिज्ञ:।

V. **संस्कृतभाषया** उत्तराणि लिखत।

ಸಂಸ್ಕೃತದಲ್ಲಿ ಉತ್ತರಿಸಿ :

Answer in **Sanskrit** :

a) **पञ्चानां** लिङ्गविभक्ति वचनानि लिखत : **(5×1=5)**

1) मन्मथ:
2) गौरीम्
3) हरिणा
4) वायो:
5) पन्था:
6) मनांसि
7) व्याघ्रात्
8) कृष्णस्य

LIBRARY
Surana College
No. 16, South End Road,
BA'GALORE - 560 004

b) पञ्चानां लकारपुरुष वचनानि लिखत : **(5×1=5)**

1) भव 2) मरिष्यति

3) अकरोत् 4) ददर्श

5) भवन्तु 6) अभविष्यत्

7) भवामि 8) अनुसरन्ति

VI. इमं परिच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत : **(5×2=10)**

रामायणे मर्यादापुरुषोत्तमस्य श्रीरामस्य जीवनवृत्तं वर्तते। अस्य रचयिता वाल्मीकि महर्षिः। सः आदिकविः आसीत्, अतः रामायणम् आदिकाव्यम् अस्ति। एतत् काव्यम् अनुष्टुप् – छन्दसि निबद्धम्। अत्र श्लोकानां संख्या चतुर्विंशतिसहस्रं वर्तते, अतः ''चतुर्विंशति–साहस्री–संहिता'' इत्यपि कथ्यते विद्वद्भिः। इदं कविना नारदमुनेः प्रेरणया ब्रह्मणः वचनेन च रचितम् ।

**प्रश्नाः :**

1) रामायणे कस्य जीवनवृत्तान्तं वर्तते ?

2) रामायणस्य रचयिता कः ?

3) रामायणम् कस्मिन् छन्दसि निबद्धम् अस्ति ?

4) रामायणस्य अपरं नाम किम् ?

5) रामायणम् कस्य प्रेरणया रचितम् ?